ऊर्ज्जितानन्दगहनां सर्व्वदेवस्वरूपिणीम् ।
परां वाग्रूपिणीं वन्दे महानीलसरस्वतीम् ॥
वासुदेवपदाम्भोजमकरन्दशिलीमुखान् ।
गुरून् प्रणम्य शान्त्यर्थं क्रियते ग्रहदीपिका ॥
महार्णवादिग्रन्थानामज्ञातारोऽल्पमेधसः ।
पश्यन्तु सततं बाला ग्रहयज्ञप्रदीपिकाम् ॥

End. ग्रन्थेऽस्मिन् गुणगणवत्वमुच्यते चेत् स्वग्रन्थ गुणगणवत्तमस्तु को न ।
तत्सन्तः शिरसि कृताञ्जलिम् यावच्छोध्यं तत्पदमदिहोदितं मया यत् ।
इति याज्ञिकसदाशिवदीक्षितकृता ग्रहदीपिका समाप्ता । संवत् १६६७ ।

No. 844.

GUṆA'MBHONIDHI ALIAS SMṚITI MAHA'RṆAVA.

गुणाम्भोनिधिः, वा स्मृतिमहार्णवः ।

Substance, country paper. Folia, 387. Lines on a page, 11. Character, Nágara. Date, ?

A Smṛiti digest. By a king named S'ríkṛishṇa. The codex is incomplete, and comprises only the chapter on Judicature.

Beginning. आद्यपचं न लभ्यम् ।

धर्म्माधिकाराख्याध्याये इयदत्र निरूपितम् ।

राज्याधिकाराध्याये तु व्यवहारनिरूपणम् ॥ २९ ॥

End. साम्राज्यं कुरुते विशङ्कमनिशं यो दक्षिणस्यां क्षितौ

राजन्यः किल सूर्य्यवंशतिलकः श्रीकृष्णपृथ्वीपतिः ।

तेनास्मिन् विदुषां सुखाय रचिते ग्रन्थे गुणाम्भोनिधौ

दिव्यानां विधिरेष पण्डितमतः सङ्क्षेपतः कीर्त्तितः ॥

No. 845.

HA'RITA SMṚITI.

हारीतस्मृतिः ।

A. Substance, country paper. Folia, 5. Lines on a page, 11. Character, Nágara. Date, ? B. Folia, 5. Lines on a page, 10. C. Folia, 10. Lines on a page, 9. D. Folia, 7. Lines on a page, 10. E. Folia, 8. Lines on a page, 11. F. Folia, 6. Lines on a page, 11. G. Folia, 6. Lines on a page, 11. H. Folia, 4. Lines on a page, 11.

The Institutes of Hárita. Printed in Calcutta. This is the smallest of the original Smṛitis, and is probably incomplete.

Beginning. हारीतेनैवमाख्यातं लोकानां हितकाम्यया ।

प्रायश्चित्तं चिकित्सार्थमेतत् प्राङ्मनीषिणः ॥

End. स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितम् ।

असम्भूय सुतान् सर्व्वान् न दानं न च विक्रयः ॥

इति हारीतप्रणीतधर्म्मशास्त्रं समाप्तम् ॥

No. 846.

HARIVAṄS'A-VILÁSA, ÁHNIKA KÁṆDA.

हरिवंशविलासे आह्निककाण्डः ।

Substance, country paper. Folia, 328. Lines on a page, 9. Character, Nágara. Date, ?

On the domestic religious duties of Vaishṇavas. By a Mahárájádhirája of the Mahendra clan. The codex contains the part which refers to obligatory daily duties.

Beginning. शुण्डादण्डस्य रोमावलिरथ वा कु+कुम्भयोः पुष्करस्य ——— ।

End. इति श्रीमहाराजाधिराजश्रीमहेन्द्रान्वये हरिवंशविलासे आह्निककाण्डः समाप्तः ।

No. 847.

JALÁS'AYOTSARGA-VIDHI.

जलाशयोत्सर्गविधिः ।

Substance, country paper. Folia, 19. Lines on a page, 8. Character, Nágara. Date, ?

Rituals for consecrating tanks, trees &c. for public use. Anonymous.

Beginning. स चोदगयेनं माघादिपञ्चसु श्रावणवर्ज्जं सर्व्वेषु मासेषु वा शुक्लपक्षे द्वितीया तृतीया पञ्चमी सप्तमी दशमी त्रयोदशी पौर्णमासीषु तिथिषु बुधगुरुशुक्रवारेषु रविसोमयोर्वा भरणी कृत्तिकार्द्रा पुनर्व्वसु अश्लेषा मघा पूर्व्वाविशाखा वर्जं नक्षत्रे

End. देवताप्रीत्यर्थं वृक्षान्दद्यादिति सङ्कल्पः । इति वृक्षदानम् ।

No. 848.

JANMADINA-VIDHI.

जन्मदिनविधिः ।

Substance, country paper. Folia, 4. Lines on a page, 7. Character, Nágara. Date, ?

On the ceremonies to be performed on the anniversary of one's birth. Anonymous.

Beginning. तत्र तिलैरङ्गमुद्वृत्य तिलैरेव स्नात्वा शुक्लवस्त्रयुगं परिधायाचान्तो गृहं प्रविश्य अश्वत्थामाबलिव्यासहनुमद्विभीषणकृपपरशुरामस्वजन्मनक्षत्रप्रजापतीन्।

End. तिलोद्वर्त्ती तिलस्नायी तिलहोता तिलप्रदः।

तिलभक्षी तिलरोपी षट्तिली नावसीदति॥ इति जन्मदिनविधिः समाप्तः।

No. 849.

JATIVIVEKA.

जातिविवेकः।

A. Substance, country paper. Folia, 7. Lines on a page, 11. Character, Nágara. Date, ? B. Folia, 15. Lines on a page, 12. C. Folia, 18. Lines on a page, 13. D. Folia, 24. Lines on a page, 10.

A dissertation on caste distinctions and their causes. All the four codices are defective, and the author's name cannot be made out.

Beginning. सद्यो जातवपुः पुराणपुरुषो रुद्रोऽपि शान्तात्मवान्

ईशानोऽपि च पश्चिमागमपरः शुक्लोऽपि कृष्णान्तरः।

वामाद्दक्षिणत‌ःकृतो मखपतिर्दक्षाध्वरध्वंसकृज्-

ज्ञाता सच्चरितं स्वमेवमखिलं यस्तं नमामीश्वरम्॥

End. अन्यच्च। संलापस्पर्शनिश्वाससहशय्यासनासनात्।

याजनाध्यापनाद्यौनात् पापं सङ्क्रमते नृणाम्॥

इति उक्ततेन सह सङ्गं कुर्य्यादित्यर्थः।

No. 850.

JAYA-SIṄHA-KALPADRUMA.

जयसिंहकल्पद्रुमः।

Substance, country paper. Folia, 710. Lines on a page, 30. Character, Nágara. Date, ?

On fasts and religious duties on auspicious lunations. Written by Ratnákara Bhaṭṭa, under the auspices of the king Jayasiṅha Varmá. The work is of considerable repute.

Beginning. करीन्द्राननं चारुचन्द्रावतंसं स्ववक्त्राङ्गपाली मिलद्भृङ्गमालम्।

अपर्णासुतं विघ्नपूगं हरन्तं गणेशं सुरेशं प्रपद्ये तमाद्ये॥

End. दिवि पञ्च कल्पतरवः परं श्रुता जयसिंहवर्म्मनृपतेः समानते।
इति श्रीदेवभट्टात्मजपौण्डरीकयाजिरत्नाकरविरचिते श्रीजयसिंहकल्पद्रुमे एकोनविंशः स्तबकः। समाप्तश्चायं ग्रन्थः।

No. 851.

JIRNODDHARA-PRATISTHAPANA-VIDHI.

जीर्णोद्धारप्रतिष्ठापनविधिः।

Substance, country paper. Folia, 6. Lines on a page, 7. Character, Nágara. Date, ?

Rules for consecrating images after repairing them. Anonymous.

Beginning. अथैका+मार्गेण चलार्चास्थापने विधिम्।
सर्व्वलोकोपकाराय वक्ष्ये बौधायनोदितम्॥
अस्मिन् पक्षे कुण्डमण्डपादीनां करणं कृताकृतं तत्र यजमानः पुण्ये काले देशे च प्रतिष्ठाङ्गभूतं स्वस्तिपुण्याहवाचनं नान्दीश्राद्धञ्च कृत्वा आचार्य्यमेकं वृणुयात्।

End. ततो नवमूर्त्तिं लिङ्गं वा कल्पोक्तविधिना स्थापयेत्। इति जीर्णोद्धारः।

No. 852.

JIVATPITRIKA-KRITYA-NIRNAYA.

जीवत्पितृककृत्यनिर्णयः।

Substance, country paper. Folia, 17. Lines on a page, 10. Character, Nágara. Date, ?

The several religious rites which a son may perform during the lifetime of his father. Anonymous.

Beginning. इह जीवत्पितृकस्य साधारणेषु स्नानसन्ध्यात्रह्मयज्ञोपासनादिषु नित्येषु ग्रहणस्नानादिषु च नैमित्तिकेषु लक्षहोमतुलापुरुषादिषु च काम्येषु विशेषाभावादप्रतिबन्ध एवाधिकारः।

End. सपिण्डीकरणानन्तरं भ्रातिमासिकेष्वपि जीवत्पितृकस्य पिण्डदानं द्रष्टव्यम्।
सपिण्डीकरणादूर्द्ध्वं यदा कुर्य्यात्तदा पुनः।

No. 853.

JÑA'NA-BHA'SKARA ALIAS SU'RYA'RṆAVA, PRA'YAS'CHITTA PRAKA'S'A.

ज्ञानभास्करे प्रायश्चित्तप्रकाशः ।

A. Substance, country paper. Folia, 607. Lines on a page, 11. Character, Nágara. Date, ? B. Folia, 8. Lines on a page, 10. A fragment.

A Smṛiti digest. The codex contains that portion of the work in which, in the form of a dialogue between Súrya and Aruṇa, the subject of expiations including that of early widowhood and the cause of it are detailed. Anonymous.

Beginning. सन्दिह्यमाने सन्दिग्धे सन्दिह्यनीह वस्तुनि ।
ज्ञानमुद्भासयन्नेष जयति ज्ञानभास्करः ॥

End. इति श्रीज्ञानभास्करे सौरगणितशास्त्रे श्रीसूर्य्यारुणसंवादे बालावैधव्यकर्म्मचिह्न-
प्रायश्चित्तप्रकाशः समाप्तः ।

No. 854.

JÑA'NA-BHA'SKARA ALIAS SU'RYA'RṆAVA, KARMA-PRAKA'S'A.

ज्ञानभास्करे, कर्म्मप्रकाशः ।

Substance, country paper. Folia, 278. Lines on a page, 11. Character, Nágara. Date, ?

A second part of the work noticed under the last preceding No. It treats of expiations for sins committed in former existences.

Beginning. बालयुक्तां स्वरूपिणीम्—— ।

End. इति श्रीज्ञानभास्करे सौरगणितशास्त्रे कर्मप्रकाशके श्रीसूर्य्यारुणसंवादे आधि-
व्याधिविधायिसकलकर्मपारप्राप्तिप्रकाशः समाप्तः ।

No. 855.

KA'LADARS'A.

कालादर्शः ।

A. Substance, country paper. Folia, 204. Lines on a page, 9. Character Nágara. Date, ? B. Folia, 69. Lines on a page 15.

On auspicious times. By A'ditya Súri, pupil of Vis'ves'vara A'chárya.

Beginning. ननु स कालः कोपयुज्यते यतस्त्वया निर्णीयते । इत्यत आह ।

कालो विधिबलादर्शपूर्णमासादिकर्मसु ।

अङ्गत्वेनेष्यते तस्मादसौ निर्णीयते मया ॥

End. अत्रत्य वचनानां ये मूलं इच्छन्ति पण्डिताः ।

तेषां प्रोक्ता इमे ग्रन्था इति दत्तं मयोत्तरम् ॥

इति श्रीमन्महोपाध्यायश्रीविश्वेश्वराचार्य्यशिष्यकविवल्लभापरनामधेयगर्गकुलतिलक-

श्रीमदादित्यसूरिविरचितः कालादर्शः समाप्तः ।

No. 856.

KA'LA-NIRNAYA'VABODHA.

कालनिर्णयावबोधः ।

Substance, country paper. Folia, 87. Lines on a page, 11. Character, Nágara. Date, ?

On auspicious times. By Ananta Daivajña, son of Kes'ava Daivajña.

Beginning. अथातः कालनिर्णयोऽभिधीयते तत्र तावत्तदुपयोगितया कालविशेषा उच्यन्ते ।

सावनसौरचान्द्रनाक्षत्राश्चतुर्द्धा मासाः तत्र सूर्य्योदयाद् द्वितीयसूर्य्योदयपर्य्यन्तं

सावनं दिनम् ।

End. नन्दिग्रामनिवासनैकगुणवान् श्रीकेशवो दैववि-

न्नानाशास्त्रविचारणे पटुमतिः ख्यातः प्रशस्त्यादिभिः ।

तज्जस्तच्चरणारविन्दभजनेऽनन्तः कनीयानिमं

चक्रे कालविनिर्णयं स्फुटतरं ग्रन्थं मुदे तद्विदाम् ॥

ग्रन्थोऽयं हि न निर्मूलो नोपेक्ष्यः सुधिया ततः ।
गुर्व्वार्य्यविप्राद्याशीर्भिराचन्द्रार्कन्तु तिष्ठतु ॥
इति श्रीकेशवदैवज्ञसुतानन्तदैवज्ञविरचितः कालनिर्णयावबोधो ग्रन्थः समाप्तः ।
शाके १४८८ ।

No. 857.

KA'LA-NIRNAYA-CHANDRIKA'.

कालनिर्णयचन्द्रिका ।

Substance, country paper. Folia, 111. Lines on a page, 9. Character, Nágara. Date, Sáka, 1599.

On times suitable for the performance of fasts. By Divákara.

Beginning. दिवाकरेण सुधिया सारमुद्धृत्य शास्त्रतः ।
शिष्टानां तन्यते तुष्ट्यै कालनिर्णयचन्द्रिका ॥

End. निम्बसप्तमीव्रतप्रकरणे नियन्त्रितस्यान्यत्र गमनायोगादुपेक्षणीयं सद्भिः ।
इति जन्माष्टमीनिर्णयः । शाके १५९९ ।

No. 858.

KA'LA-NIRNAYA-DI'PIKA'.

कालनिर्णयदीपिका ।

A. Substance, country paper. Folia, 28. Lines on a page, 9. Character, Nágara. Date, ? B. Folia, 44. Lines on a page, 9. C. Folia, 38. Lines on a page, 10. D. Folia, 26. Lines on a page, 10. E. Folia, 22. Lines on a page, 11.

A work on the same subject as the last. By Rámachandra A'chárya, pupil of Vittala.

Beginning. कालचक्रप्रयोक्तारं नत्वा श्रीविट्ठलं गुरुम् ।
धर्म्मज्ञानार्थमातन्मः(?) कालनिर्णयदीपिकाम् ॥

End. दुर्बोधग्रन्थसिद्धान्तध्वान्तसन्ध्याप्रभञ्जिका ।
सल्लक्षणाञ्चकार रामार्य्यः कालनिर्णयदीपिकाम् ॥
इति श्रीमद्रामचन्द्राचार्य्यविरचिता कालनिर्णयदीपिका समाप्ता ।

No. 859.

KA'LANIRNAYA-DI'PIKA'-VIVARANA.

कालनिर्णयदीपिकाविवरणम् ।

A. Substance, country paper. Folia, 124. Lines on a page, 16. Character, Nágara. Date, ? B. Folia, 114. Lines on a page, 10.

A gloss or Vivaraṇa, by Nṛisiñha, son of Rámachandra A'chárya, on the commentary noticed under the last preceding No. 'Notices, Sanskrit MSS. I, p. 75.'

Beginning. श्रीविट्ठलं श्रुतिशिरः प्रथितप्रभाव+++मानममरेश्वरराजहंसम् ।
श्रीरामचन्द्रगुरुमेकमनेकशास्त्रे पारीणकोविदसुरीणमहं नमामि ॥
येन व्याकरणार्णवैकतरणिः सा प्रक्रियाकौमुदी,
वेदान्तानुगता च वैष्णवमहासिद्धान्तमद्दीपिका ।
कालज्ञानविधौ व्यधायि विबुधानन्दि प्रबन्धत्रयं,
कृष्णाचार्य्यसुतः स नः सुखयतु श्रीरामचन्द्रो गुरुः ॥

End. परमहंसपरिव्राजकाचार्य्यश्रीगोपालगुरुपूज्यपादशिष्यश्रीरामचन्द्राचार्य्यसुतश्रीनृसिंहाचार्य्यकृतं कालनिर्णयदीपिकाविवरणं समाप्तम् ।

No. 860.

KA'LANIRNAYA-PRAKA'S'A ALIAS KA'LANIRNAYA.

कालनिर्णयप्रकाशः, वा कालनिर्णयः ।

A. Substance, country paper. Folia, 153. Lines on a page, 10. Character, Nágara. Date, ? B. Folia, 43. Lines on a page, 11. C Folia, 102. Lines on a page, 10. D. Folia, 186. Lines on a page, 9.

An essay on auspicious and inauspicious times. By Rámachandra A'chárya, son of Viṭṭala, grandson of Bálakrishṇa.

Beginning. श्रीनृसिंहपदद्वन्द्वं नत्वा गणपतिं गुरून् ।
रामचन्द्रोऽतिमङ्गलिप्तं कुरुते कालनिर्णयम् ॥

End. इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सदुपनामकभट्टबालकृष्णात्मजभट्टविट्ठलसूनुभट्टरामचन्द्रकृतः कालनिर्णयप्रकाशः समाप्तः ।

No. 861.

KALANIRṆAYA-SAṆGRAHA.

कालनिर्णयसङ्ग्रहः सटीकः, वा कालनिर्णयसङ्ग्रहश्लोकविवरणम्।

A. Substance, country paper. Folia, 11. Lines on a page, 15. Character, Nágara. Date, ? B. Folia, 19. Lines on a page, 11. C. Folia, 17. Lines on a page, 11. D. Folia, 13. Lines on a page, 10.

A commentary on Mádhaváchárya's memorial verses on auspicious lunations, No. 885. The name of the commentator is Náráyaṇa, son of Rámes'vara Súri.

Beginning. टीकायाः । सूरिरामेश्वरस्याद्यः सूनुर्नारायणः कृती ।
कृतवान् माधवाचार्य्यसङ्ग्रहश्लोकनिर्णयम् ॥
मूलस्य । व्याख्याय माधवाचार्य्यो धर्म्मान् पाराशरानथ ।
तनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः ॥

End. इति श्रीमाधवीयकालनिर्णयसङ्ग्रहश्लोकाः ।

No. 862.

KALAS'A'HVA'NA-PUJANA'DI-PADDHATI ALIAS CHA'TUS'-CHARAṆA-KALAS'A'HVA'NA-PADDHATI.

कलशाह्वानपूजनादिपद्धतिः, वा चतुश्चरणकलशाह्वानपद्धतिः ।

Substance, country paper. Folia, 8. Lines on a page, 12. Character, Nágara. Date, ?

Mantras for performing certain rites for appeasing irate planets.

Beginning. गणानां त्वा गणपतिं हवामहे
प्रियाणां त्वा प्रियापतिं हवामहे ।
निधीनां त्वा निधिपतिं हवामहे
वसो ममत्वाहमजानि गर्भधं मात्वजानि गर्भधम् (?) ॥

End. प्रथमा ध्वंसनी ऽ द्वितीया विंशनी ऽऽ तृतीया परमा विराट ऽऽ मेतावा परम विराड् ऽऽ परमा वा परमेष्ठी(?) ॥ इति चतुश्चरणकलशाह्वानपद्धतिः समाप्ता ॥

No. 863.

KARMAKA'ṆḌA-PADDHATI.

कर्म्मकाण्डपद्धतिः ।

Substance, country paper. Folia, 16. Lines on a page, 9. Character, Nágara. Date, ?

Rules for the performance of domestic rites.

Beginning. सायमग्निहोत्रानन्तरं यदि यजमानो दुर्बलः क्षीणो भवेत् ।

End. ऊर्णासूत्रेण बद्धैव यवपिष्टैर्विलेपयेत् ।
निर्दिश्य देवदत्तोऽयं नाम्नेत्यादि ॥

No. 864.

KARMA-VIPA'KA.

कर्म्मविपाकः ।

A. Substance, country paper. Folia, 10. Lines on a page, 15. Character, Nágara. Date, ? B. Folia, 8. Lines on a page, 11. C. Folia, 9. Lines on a page, 10. D. Folia, 17. Lines on a page, 9. E. Folia, 40. Lines on a page, 10.

Consequences in the present life of virtuous and sinful acts of a former existence. By Sátátapa. 'Notices of Sanskrit MSS. II, p. 4.'

Beginning. प्रायश्चित्तविहीनानां महापातकिनामपि ।
नरकान्ते भवेज्जन्म चिह्नाङ्कितशरीरिणाम् ॥
प्रतिजन्मभवेत्तेषां चिह्नं तत्पापसूचकम् ।
प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनः ॥

End. ततः प्रेतत्वनिर्मुक्ताः पितरस्तर्पितास्तथा ।
दद्युः पुत्रांश्च पौत्रांश्च आयुरारोग्यसम्पदः ॥
इति शातातपेनोक्तः विपाकः कर्म्मणामयम् ।
शिष्याय शरभङ्गाय विनयात् परिपृच्छते ॥ संवत् १६६० ।

No. 865.

KARMA-VIPÁKA-RATNA.

कर्म्मविपाकरत्नम् ।

Substance, country paper. Folia, 175. Lines on a page, 9. Character, Nágara. Date, ?

Diseases and evils resulting in this life from sins committed in a former one. By Kamalákara Bhaṭṭa, son of Rámakṛishṇa Bhaṭṭa, and grandson of Náráyaṇa Bhaṭṭa.

Beginning. नत्वा रामकृष्णाख्याद्य पितरं शारदाशिवम् ।
श्रीरामकृष्णतनयः कमलाकरसञ्ज्ञितः ॥

End. श्रीमन्नारायणाख्यात् समजनि विबुधो रामकृष्णाभिधान-
स्तत्सूनुः सर्व्वविद्याम्बुधिनिजचुलुकीकारतः कुम्भजन्मा ।
दृष्ट्वा नानानिबन्धान् व्यरचयदतुलग्रन्थरत्नाकराख्यं
पित्रोर्पादाब्जभृङ्गो रघुपतिपदपांसाश्रयं प्राप्य धीमान् ॥
इति श्रीमन्महोपाध्यायनारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृतं कर्मविपाकरत्नं समाप्तम ॥ सं १७२२ ।

No. 866.

KARMA-VIPÁKA-SANGRAHA.

कर्म्मविपाकसङ्ग्रहः ।

Substance, country paper. Folia, 25. Lines on a page, 10. Character, Nágara. Date, Saka 1540.

A compendium showing the several diseases and evils which result from sins committed in a former life.

Beginning. अथ प्रायश्चित्तविधिः । तत्रादौ पापिनामचीर्णप्रायश्चित्तानां नरकभोगान्ते ये कर्मविपाकाः स्युः तत् इहोच्यन्ते ।

End. प्राजापत्यं चरेत् कृच्छ्रमतिकृच्छ्रन्तथैव च ।
अग्निमन्त्रं जपेन्नित्यं श्रीसूक्तञ्च विचक्षणः ॥
कर्मविपाकसङ्ग्रहः समाप्तः । शाके १५४० ।

No. 867.

KARMA-VIPÁKA-SÁRA.

कर्म्मविपाकसारः ।

A. Substance, country paper. Folia, 55. Lines on a page, 9. Character, Nágara. Date, ? B. Folia, 52. Lines on a page, 11.

A work of the same kind as the one described under the last preceding No.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

End. अग्नेः संस्थापनं कार्य्यं ।

No. 868.

KAS'YAPA-SMṚITI.

कश्यपस्मृतिः ।

A. Substance, country paper. Folia, 3. Lines on a page, 10. Character, Nágara. Date, ? B. Folia, 4. Lines on a page, 11.

The Institutes of Kas'yapa. A very rare work, but quotations from it occur in Smṛiti compilations.

Beginning. ° ° °

End. यस्तु सत्येन धर्म्मेण पिता समर्पयते सुतान् ।
स प्रेत्य लभते स्थानं यथा दक्षः प्रजापतिः ॥
इति कश्यपप्रोक्तं धर्म्मशास्त्रं समाप्तम् ॥

No. 869.

KÁTYÁYANA-NAVA-KAṆḌIKÁ.

कात्यायननवकण्डिका ।

Substance, country paper. Folia, 4. Lines on a page, 9. Character, Nágara. Date, ?

Rules regarding S'ráddhas. By Kátyáyana. Not having the codex at hand, I cannot ascertain if this is a distinct work or an extract from the author's Gṛihya Sútras.

Beginning. अपरे पक्षे श्राद्धं कुर्व्वीतोर्द्धं वा चतुर्थ्याः यदहः सम्पद्यते तदहः ब्राह्मणानाम् ।

End. हिरण्यं द्वादश्यां कूप्यं ज्ञातिश्रेष्ठं त्रयोदश्यां युवानस्तत्र म्रियन्ते शस्त्रहतस्य चतुर्द्दश्याममावस्यायां सर्व्वमित्यमावस्या सर्व्वमिति ।

इति कात्यायनकृतनवकण्डिका ॥

No. 870.

KA'TYA'YANA-SNA'NAVIDHI-SUTRA-VIVARANA.

कात्यायनस्नानविधिसूत्रविवरणम् ।

Substance, country paper. Folia, 19. Lines on a page, 8. Character, Nágara. Date, ?

A commentary on Kátyáyana's aphorisms on religious bathing, and on the duties appertaining thereunto. By Harihara.

Beginning. कात्यायनकृतस्नानविधिव्याख्यापुरःसरम् ।

विधास्ये पद्धतिं विद्वत्सदाचारद्विजप्रियाम् ॥

End. इति नमस्कारस्य ।

इत्यग्निहोत्रिहरिहरविरचितं कात्यायनस्नानविधिसूत्रविवरणं समाप्तम् ।

No. 871.

KRITYA KALPATARU.

कृत्यकल्पतरुः ।

Substance, country paper. Folia, 479. Lines on a page, 10. Character, Nágara. Date, ?

A Smriti compilation on the duties, feasts, fasts and observances meet for householders. Written by Lakshmídhara under the auspices of the king Govindachandra Deva of Kanauj.

Beginning. येन प्रत्यक्षमन्वस्मिन्प्रपश्यसि स्नानादिभिः कर्म्मभिः ।

End. इति महाराजाधिराजश्रीमद्गोविन्दचन्द्रदेवमहासन्धिविग्रहिकगुरोराज्ञया भट्टहृदयधरात्मजभट्टश्रीलक्ष्मीधरविरचिते कृत्यकल्पतरौ गृहस्थकाण्डं समाप्तम् ॥

No. 872.

KṚITYA-RATNÁVALÍ.

कृत्यरत्नावली ।

Substance, country paper. Folia, 62. Lines on a page, 20. Character, Nágara. Date, ?

On fasts and rites to be performed on particular lunations. By Rámachandra Bhaṭṭa.

Beginning. नमस्कृत्य रमानाथं भट्टविट्ठलसूनुना ।
कृत्यरत्नावली रम्या तन्यते विदुषां मुदे ॥

End. अनया प्रीयतां लक्ष्मीनृसिंहो भक्तवत्सलः ।
कुलदैवतमित्येतद् ब्रुवतां स्याच्छुभा मतिः ॥ इति कृत्यरत्नावली समाप्ता ॥

No. 873.

KSHAURA-VIDHI.

क्षौरविधिः ।

Substance, country paper. Folium, 1. Lines on a page, 11. Character, Nágara. Date, ?

Rules and directions for shaving as a duty. The author's name is not apparent.

Beginning. वामहस्तस्योपरि उदकं गृहीत्वा तेन जलेन वामपाणिपादद्वयं सम्प्रोक्ष्य मध्या-
ङ्गुलिभिः शिरसि अङ्गुष्ठानामिकाभ्यां चक्षुषि ।

End. महापापोपपापात्मा केशश्मश्रुनखा—— ।

No. 874.

KSHAYA-MÁSA-KṚITYA-NIRṆAYA.

क्षयमासकृत्यनिर्णयः ।

Substance, country paper. Folia, 276. Lines on a page, 11. Character, Nágara. Date, ?

Special religious duties and S'ráddhas enjoined to be performed in a lunar month in course of which two solar sankrántis occur, as also in intercallary months. The former is called a '.Kshayamása,' and the latter 'Malamása.'

Beginning. यद्वर्षमध्येऽधिकमासयुग्मं तत्कार्त्तिकादित्रितयो क्षयाख्यः ।
मासत्रयं त्याज्यमिदं प्रयत्नात् विवाहयज्ञोत्सवमङ्गलेषु ॥

End. इति क्षयमासे श्राद्धनिर्णयः ।

No. 875.

KURUKSHETRA-MÁHÁTMYA ALIAS KURUKSHETRA-PRADÍPA.

कुरुक्षेत्रमाहात्म्यं वा कुरुक्षेत्रप्रदीपः ।

Substance, country paper. Folia, ? Lines on a page, ? Character, Nágara. Date, Samvat, 1741.

On pilgrimage to the different sacred spots in Kurukshetra or the battle-field of the Kurus and the Páṇḍus, modern Pánipat. By Mádhava Ácharya.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
अनादिशक्तिमानस्य सच्चिदानन्दविग्रहम् ।
कुरुक्षेत्रादिमाहात्म्यसङ्ग्रहः क्रियते मया ॥

End. यज्ञादिप्रसादादस्माकं ब्राह्मणानां वचनाच्च सर्व्वं साङ्गमस्त्विति वाचयित्वाशिषस्तेभ्यो गृह्णीयात् । इति तीर्थयात्रापरिच्छेदस्तृतीयः । सं १७४१ ।

No. 876.

LAGHU-KÁLA-NIRṆAYA.

लघुकालनिर्णयः ।

Substance, country paper. Folia, 17. Lines on a page, 11. Character, Nágara. Date, ?

An elementary treatise on auspicious lunations. By Mádhava.

Beginning. व्याख्याय माधवाचार्य्यो धर्म्मान् पाराशरानथ ।

तदनुष्ठानकालस्य व्याख्यानं कर्त्तुमुद्यतः ॥

End. व्यतीपाते च वैधृत्यां तत्कालव्यापिनी तिथिः ।

तत्कालव्यापिनी श्राद्धे कुर्य्यादपराह्णव्यापिनी—— ॥

इति माधवीये लघुकालनिर्णयः समाप्तः ।

No. 877.

LAGHU-PADDHATI.

लघुपद्धतिः ।

Substance, country paper. Folia, 193. Lines on a page, 13. Character, Nágara. Date, ?

A Smṛiti digest treating of all the leading topics of Áchára and Vyavahára. By Kṛishṇa, son of Purushottama, and grandson of Raghunátha. The codex is incomplete.

Beginning. नत्वा शिवमुमानाथं रघुनाथं पितामहम् ।

तस्य पुत्रांश्च धर्म्मज्ञान् सदानुध्यानतत्परान् ॥

पुरुषोत्तमपुत्रेण कृष्णेन विदुषा नु यत् ।

सर्व्वलोकोपकाराय क्रियते लघुपद्धतिः ॥

विलोक्य पद्धतीः सर्व्वा वृत्तिं कारिकया सह ।

भाष्यं वामनकञ्चैव जयन्तं मुग्धदीपकम् ॥

End. इति पिण्डपितृयज्ञः ।

No. 878.

LAGHU-PADDHATI, GODÁNA.

लघुपद्धतिः, गोदानम् ।

Substance, country paper. Folia, 14. Lines on a page, 10. Character, Nágara. Date, ?

A part of the work noticed under the last preceding No. The codex contains only that portion of the work which relates to the gift of kine.

Beginning. अथ नानाद्रव्याणां दानमन्त्राः। तत्रादौ द्रव्यदानानाम्। तानि च महार्णवे सङ्ग्रहे।

गोभूतिलहिरण्याज्यवासो धान्यं गुडानि च।

रौप्यलवणमित्याहुर्द्रव्यदानानि पण्डिताः॥

End. ब्राह्मणेभ्यो निवेद्य वस्त्रयुग्मानि कुण्डलयुग्मानि। (अन्तं न लब्धम्)।

No. 879.

LAGHUPADDHATI, TRIPINDI-SRADDHA-VIDHANA.

लघुपद्धतौ त्रिपिण्डीश्राद्धविधानम्।

Substance, country paper. Folia, 25. Lines on a page, 11. Character, Nágara. Date, ?

Another part of the work noticed under No. 877. It treats of a particular form of S'ráddha, called Tripindí, or three-fold offering.

Beginning. अथ त्रिपिण्डीश्राद्धविधानम्। तीर्थं गत्वा स्नानं सन्ध्याह्निकं कृत्वा स्थलं प्रक्षाल्य तत्र गोमयेनोपलेपयेत्। तत्र षोडशोपचाराः।

End. दिव्यन्तरिक्षभूमिस्थाः सात्विका राजसास्तथा।

प्रेताश्च तामसा येऽन्य शान्तिं यच्छन्तु तर्पिताः॥

इति त्रिपिण्डीश्राद्धकर्त्तव्यताविधिः।

No. 880.

LAKSHA-HOMA PADDHATI.

लक्षहोमपद्धतिः।

Substance, country paper. Folia, 44. Lines on a page, 11. Character, Nágara. Date, ?

Description and importance of a rite which involves the necessity of offering a hundred thousand oblations to the fire. Anonymous.

Beginning. श्रीकामादिः प्रसन्ने चानुकूले सुलग्नजन्मादौ(?) सुस्नातः प्रक्षालितपाणिपादः यजमानः कृतमाङ्गलिकक्रियः कृतनित्यक्रियः कुशपवित्रान्वितदक्षिणकरो वामहस्तधृतबद्धकुशो गोमयलिप्तभूम्यां ।

End. अनेन विधिना यस्तु ग्रहपूजां समाचरेत् ।
सर्व्वान् कामानवाप्नोति प्रेत्य स्वर्गे महीयते ॥ इति लक्षहोमपद्धतिः ।

No. 881.

LAKSHA-HOMA VIDHI.

लक्षहोमविधिः ।

Substance, country paper. Folia, 24. Lines on a page, 13. Character, Nágara. Date, ?

A manual for the performance of the rite described under the last preceding No. By Kamalákara Bhaṭṭa.

Beginning. श्रीरामं सपरिवारं प्रणम्य कमलाकरः ।
कुर्व्वे सुखाववोधार्थं सर्व्वशास्त्रार्थनिर्णयं ॥

End. विदेशस्थो वा विगताग्निको वा रजस्वलायामपि धर्मपत्न्याम् ।
श्राद्धं मृताहे विदधीत प.कैर्नामेन होमा न तु पञ्चमेऽहनि(?) ॥

No. 882

LAKSHANA-SAMUCHCHAYA.

लक्षणसमुच्चयः ।

A. Substance, country paper. Folia, 276. Lines on a page, 11. Character, Nágara. Date, ? B. Folia, 232. Lines on a page, 11.

On divination from bodily signs. By Hemádri.

Beginning. नराणां योषिताञ्चैव लक्षणानि महामते ।
प्रोक्तानि यानि विप्रेन्द्र रोमकेशस्य सूनुना ॥
कृतेन यानि चिह्नानि ईश्वरेण महोदधौ ।
कृष्णस्य वचनाद्भूयः समुद्रेणार्पितानि वै ॥

End. देशेषु देशेषु पृथग्विभिन्नं न शक्यते तल्लक्षणमु वक्तुम् ।
लोकेषु यस्मादपभ्रष्टसञ्ज्ञं ज्ञातं हि तद्देशविदाधिकारैः ॥
इति प्राकृतलक्षणम् । इति श्रीहेमाद्रिविरचितं लक्षणसमुच्चयप्रकरणम् ।

No. 883.

LIKHITA-SMṚITI.

लिखितस्मृतिः ।

Substance, country paper. Folia, 8. Lines on a page, 8. Character, Nágara. Date, ?

The Institutes of Likhita. Printed in Calcutta, but the recension from which it was taken was defective. The codex under notice seems to be larger and apparently complete.

Beginning. इष्टापूर्त्तेऽनुकर्त्तव्ये ब्राह्मणेन प्रयत्नतः ।
इष्टेन लभते स्वर्गं पूर्त्ते मोक्षमवाप्नुयात् ॥

End. यत्र यत्र च सङ्कीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्यष्टशतं जपेत् ॥
इति श्रीलिखितप्रोक्तं धर्म्मशास्त्रं समाप्तम् ।

No. 884.

MADANA-PÁRIJÁTA.

मदनपारिजातः ।

A. Substance, country paper. Folia, 111. Lines on a page, 13. Character, Nágara. Date, ? B. Folia, 237. Lines on a page, 14. Character, Nágara. C. Folia, 330. Lines on a page, 14. D. Folia, 340. Lines on a page, 9, 10. E. Folia, 310. Lines on a page, 11. F. Folia, 371. Lines on a page, 11. A. and B. are defective.

The duties of the different orders of people; a Smṛiti compilation of great authority in the North Western Provinces. By Vis'ves vara Bhaṭṭa. 'Notices of Sanskrit MSS. I, 242.'

Beginning. प्रवालाद्रिप्रस्थ-द्युतिनिचयपर्य्यायवपुषे
नमो विघ्नश्रेणी-विघटनवरिष्ठाय महसे ।
जगत्प्रादुर्भावस्थितिलयनिरासाय रचना-
विनोदासक्ताय प्रणतफलसिद्धिप्रतिभुवे ॥

End. इति श्रीपेटिभट्टात्मजभट्टश्रीविश्वेश्वरविरचिते श्रीमदनपारिजाते प्रायश्चित्तस्तवको नाम नवमस्तवकः समाप्तः । शाके १५४२ ।

No. 885.

MADHAVI'YA-SLOKA.

माधवीयश्लोकाः ।

Substance, country paper. Folia, 6. Lines on a page, 11. Character, Nágara. Date, ?

Memorial verses on auspicious lunations. By Mádhava Ácharya.

Beginning. व्याख्याय माधवाचार्य्यो धर्म्मान् पाराशरानथ ।

End. ग्रस्तावेवास्तमानौ तु रवीन्दू प्राप्नुतो यदि ।
तयोः परं गुरुदये स्नात्वाभ्यवहरेत्ततः ॥
इति माधवीयश्लोकाः समाप्ताः ।

No. 886.

MADHU-VIDHVAÑSA-BHÁSKARA.

मधुविध्वंसभास्करः ।

Substance, country paper. Folia, 33. Lines on a page, 13. Character, Nágara. Date, ?

An astrology. By Harináráyaṇa, son of Jyeshṭha Mis'ra.

Beginning. वागीश्वरीं सदा नौमि यत्कृपाद्योतिताचरः ।
ग्रन्थं करोमि सुधीयामानन्दकरमद्भुतम् ॥
गर्गाचार्य्यकुलोद्भवो समभवद्गोवर्द्धनाख्यः सुधीः
श्रीमत्स्वतवंशभूषणमणिः प्रज्ञावतामग्रणीः ।
स्फूर्य्यत्कुन्दसमूहनिर्मलयशा विद्याविनोदी कृती
तर्कोद्दर्कविशुद्धसिद्धचरितो विज्ञातपारायणः ॥
तत्सुतो ज्येष्ठमिश्रोऽस्ति वेदशास्त्रनिकेतनः ।
राजते यो द्विजेन्द्रेषु विश्रुतो भुवनोदरे ॥

End. तस्मात्त्वमपि धर्मज्ञ योगधर्म्मपरो भव ।
तत्परः प्रयतः श्राद्धी योगधर्म्ममवाप्स्यसि ॥
इति श्रीज्येष्ठमिश्रात्मजहरिनारायणकृतो मधुविध्वंसभास्करः सम्पूर्णः ।

No. 887.

MA'DHYANDINA-TULA'DA'NA-PRAYOGA.

माध्यन्दिनतुलादानप्रयोगः ।

Substance, country paper. Folia, 32. Lines on a page, 8. Character, Nágara. Date, ?

A guide to the performance of the rite called *Tulápurusha-dána* according to the rules of the Mádhyandiní school of the White Yajur Veda. Its author's name cannot be made out. The rite requires the presentation to Bráhmaṇs of gold, rice &c. of the weight of the performer of the rite for the remission of his sins.

Beginning. अथैकाग्निविधानेन यजुर्वेदान्तर्गतमाध्यन्दिनानां तुलादानप्रयोगो लिख्यते
तत्र तुलादानकरिष्यमानदिनात् पूर्व्वदिने पूर्व्वाह्णे कृतनित्यकर्म्मा सुप्रक्षालित-
पाणिपाद आचम्य प्राङ्मुख उपविश्य ।

End. ब्राह्मणान् तु भोजयेत् ततो विष्णुस्मरणं कृत्वा अच्छिद्रं वाचयित्वा भुञ्जीतेति ।

No. 888.

MAHA'RNAVA-BHIDHA'NA, KARMAVIPA'KA-SAÑGRAHA.

महार्णवे कर्मविपाकसङ्ग्रहः ।

Substance, country paper. Folia, 284. Lines on a page, 11. Character, Nágara. Date, ?

A Smriti digest. The codex contains only that portion of it which treats of evils and misfortunes consequent on sinful actions committed in a former existence, and the expiations to be performed in order to obviate those evils. By Mándhatá, son of Madanapála.

Beginning. श्रुतिस्मृति-पुराणानि समालोक्य यथामति ।
निबद्धस्य समासेन निबन्धोऽयं महार्णवः ॥

End. इति श्रीपण्डितपारिजातकट्टारभट्टेत्यादिविरुदविराजमानश्रीमदनपालपुत्रस्य मान्धातुर्निबन्धे महार्णवाभिधाने कर्मविपाकसङ्ग्रहप्रकरणं समाप्तम् ॥

No. 889.

MAHISHI'DA'NA-PRAYOGA.

महिषीदानप्रयोगः ।

Substance, country paper. Folia, 4. Lines on a page, 9. Character, Nágara. Date, ?

Rules for the performance of the sacrifice of a female buffaloe for the atonement of sins.

Beginning. अद्येत्यादि ममप्राक्तनकर्मजनितसन्तानप्रतिबन्धकनिवारणार्थं रक्तद्रव्ये पंचकगु-
तां(?) सूर्यमूर्त्तिदानं करिष्ये इति सङ्कल्पः ।

End. ततः महिषीदानस्य साङ्गतासिद्ध्यर्थं सुवर्णत्रयं दक्षिणां दद्यात् । ततो भयभी नानानामगोत्रेभ्यो दद्यात् । इति महिषीदानप्रयोगः ।

No. 890.

MAKARANDA-PRAKA'S'A, SAÑSKA'RA-PARICHCHHEDA

मकरन्दप्रकाशे संस्कारपरिच्छेदः ।

Substance, country paper. Folia, ? Lines on a page, ? Character, Nágara. Date, Samvat 1725.

A Smṛiti digest. The codex contains only that portion which treats of the essential sacraments. By Harikṛishṇa Siddhánta.

Beginning. अथाह्निकपरिच्छेदानन्तरं क्रमप्राप्तसंस्कारपरिच्छेदः प्रारभ्यते। तत्र संस्कारः द्विविधः ब्राह्मो दैवश्च।

End. इति श्रीहरिकृष्णसिद्धान्तविरचितेन करन्दप्रकाशे संस्कारपरिच्छेदः। सं१७२५।

No. 891.

MAKARANDA-PRAKA'S'A-DVIRA'GAMANA-PRAKARAṆA.

मकरन्दप्रकाशे द्विरागमनप्रकरणम्।

Substance, country paper. Folia, 338. Lines on a page, 10. Character, Nágara. Date, ?

Another part of the work noticed under the last preceding No. It treats of the time most auspicious for a bride to go to her husband's house for permanent residence.

Beginning. लम्बोदरं सकलदेवनिकायसेव्यम्
देव्यङ्गजं सुरनदीजलकेलिलोलम्।
रोलम्बलम्बितकटं विकटं समस्त-
विघ्नप्रसारहरणं शरणं प्रयामः॥

End. इति मकरन्दप्रकाशे द्विरागमनप्रकरणं समाप्तम्।

No. 892.

MAKHATRAYA-VIDHA'NA.

मखत्रयविधानम्।

Substance, country paper. Folia, 20. Lines on a page, 10. Character, Nágara. Date, ?

Directions for the performance of three sacrificial rites in order to propitiate adverse planets. The performance of these sacrificial rites are calculated to secure the sure prospect of heaven after death, and to procure fame and prosperity in this world. Anonymous.

Beginning. त्रिविधो नवग्रहमखः अयुतलक्षकोट्यात्मकः तत्रायुतहोमप्रकारः श्रीकामादिः प्रशस्ते। स्वानुकूले शुभलग्नादौ स्नातः प्रक्षालितपाणिपादः आचान्तो यजमानः

कृतमाङ्गलिको देशकालौ सङ्कीर्त्त्य अमुकशर्मा अयुतहोमेन यक्ष्य-इति सङ्कल्प्य आभ्युदयिकं यथाशक्ति ।

End. जन्मनक्षत्रपीड़ासु अनावृष्टिभयेषु च । क्रूरासु ग्रहपीड़ासु दुर्भिक्षे राष्ट्रविप्लवे ॥ व्याधितासम्भवे जाते शरीरे चातिपीड़िते । क्षेमे महति चोत्पन्ने कर्त्तव्यन्तु मखत्रयम् ॥ स्वर्गस्य साधनञ्चैतत् कीर्त्तनं धनदन्तथा । मखत्रयं प्रकर्त्तव्यं येन शान्तिर्भवेत् नृणाम् ॥ इति ॥

No. 893.

MALAMA'SA-VICHA'RA.

मलमासविचारः ।

Substance, country paper. Folia, 5. Lines on a page, 10. Character, Nágara. Date, ?

On intercallary months. Anonymous. The work was written on the completion of the 1500th year of the S'aka era = A. D. 1578.

Beginning. अस्मिन् अधिकषोड़शशतशके कन्यायामसङ्क्रान्तो माम आश्विनसञ्ज्ञो मलमासश्च ।

End. मीनादिस्थेति लक्षणन्तु उत्पातेन भवेदिति वचनाच्छक्तुवेलान्यायेन सङ्गमनीयम् ।

No. 894.

MANTRA'RTHA-PADDHATI.

मन्त्रार्थपद्धतिः ।

Substance, country paper. Folia, 122. Lines on a page, 13. Character, Nágara. Date, ?

Directions for the performance of s'ráddhas for the manes of Yatis. It also contains a summary of the laws of inheritance.

Beginning. तस्यापि च विनिर्दिष्टं तद्वदेव मनीषिभिरिति ।

शातातपोऽपि । केशकीटशुनास्पृष्टं वायसोपहतं च यत् ।

End. वृद्धवसिष्ठोऽपि ।

यतीनान्तु न संस्कारः कर्त्तव्योऽत्र सुतैः सदा ।

त्रिदण्डीग्रहणादेव प्रेतत्वं नोपपद्यते ॥

इति श्रीयतिश्राद्धविषयः । इति साधिकारनिर्णयः समाप्तः ।

53

No. 895.

MANGALA-NIRṆAYA.

मङ्गलनिर्णयः ।

Substance, country paper. Folia, 13. Lines on a page, 9. Character, Nágara. Date, ?

The rites to be performed at marriage and other sacraments. By Gaṇes'a, son of Kes'ava Daivajña.

Beginning. अथ विवाहोपनयनादिकर्त्तव्यतानिर्णय उच्यते ॥ तत्रादावेकमातृप्रसूतयोः संहितासारावल्यां । एकमातृप्रसूतानामेकस्मिन् वत्सरे यदि विवाहं नैव कुर्व्वन्ति ॥

End. अज्ञतविबुधतुष्ट्यै भ्रान्तिलेशं निरस्य व्रतपरिणयनादेर्निर्णयं शास्त्रतत्त्वम् ।
स्वपितृपदानुकम्पाप्राप्तसद्बोधलेशो गणकगणावतंसः केशविः श्रीगणेशः ॥
इति श्रीएकलागर्माचार्य्यश्रीकेशवदैवज्ञसुतगणेशविरचितो मङ्गलनिर्णयः समाप्तः ।

No. 896.

MAŃGALA'RCHANA-PADDHATI.

मङ्गलार्चनपद्धतिः ।

Substance, country paper. Folia, 13. Lines on a page, 7. Character, Nágara. Date, ?

Directions for the worshipping of the planet Mañgala or Mercury. By one A'chárya whose name is not given.

Beginning. श्रीमद्देशं गणेशानं श्रीगुरोश्चरणाम्बुजम् ।
नत्वा सङ्क्षेपतो वक्ष्ये मङ्गलार्चनपद्धतिम् ॥

End. तत्र तिलैर्होमं कृत्वा शतब्राह्मणान् भोजयित्वा स्वर्णमयीं भौमप्रतिमां मण्डलस्थघटे सम्पूज्य गुरवे दद्यादिति । एवमृणनाशाय वित्तार्थमपि व्रतं कुर्व्वंस्तत्र तत्र दुग्धः(?) कुर्य्यादिति सङ्क्षेपः । इत्याचार्य्यकृतभौमार्चनपद्धतिः समाप्ता ॥

No. 897.

MANU-SAŃHITA' ALIAS MÁNAVA DHARMAS'A'STRA.

मनुसंहिता ।

A. Substance, country paper. Folia, 180. Lines on a page, 8. Character, Nágara. Date, Samvat, 1750. B. Folia, 107. Lines on a page, 9. C. Folia,

84. Lines on a page, 12 to 14. D. Folia, 84. Lines on a page, 11. E. Folia, 177. Lines on a page, 10. F. Folia, 85 Lines on a page, 14.

The Institutes of Manu. They have been repeatedly printed, and translated into English and French.

Beginning. मनुमेकाग्रमासीनमभिगम्य महर्षयः। प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥

End. इत्येतन्मानवं शास्त्रं भृगुप्रोक्तं पठन् द्विजः।
भवत्याचारवान्नित्यं यथेष्टां प्राप्नुयाद्गतिम् ॥
इति श्रीमानवे धर्म्मशास्त्रे सकलधर्म्मशास्त्रशिरोमणौ द्वादशोऽध्यायः। संवत् १७५०

No. 898.

MANU-SAṄHITA.

मनुसंहिता।

Substance, country paper. Folia, 125. Lines on a page, 10. Character, Nágara. Date, ?

Another copy of the work noticed under the last preceding No. The first s'loka here given is remarkable. It announces that the writer of it is the digester of the teachings of Manu, and that the work is his, not Manu's. It occurs in none of the editions of Manu published, nor in any of the several MSS. I have seen. There would be no object gained by introducing it surreptitiously, but its omission has led to the work being often mistaken as that of Manu.

Beginning. स्वयम्भुवे नमस्कृत्य ब्रह्मणेऽमिततेजसे।
मनुप्रणीतान् विविधान् धर्म्मान् वक्ष्यामि शाश्वतान्।
मनुमेकाग्रमासीनमभिगम्य महर्षयः।
प्रतिपूज्य यथान्यायमिदं वचनमब्रुवन् ॥

End. इति श्रीमानवे धर्म्मशास्त्रे भृगुप्रोक्तायां संहितायां द्वादशोऽध्यायः

No. 899.

MANU SMṚITI WITH MANVARTHA-MUKTÁVALÍ.

मनुस्मृतिः मन्वर्थमुक्तावल्याख्यटीकासहिता ।

Substance, country paper. Folia, 250. Lines on a page, 15. Character, Nágara. Date, ?

Another copy of the work noticed under No. 897. It is accompanied with the commentary named Manvartha-muktávalí by Kulluka Bhaṭṭa. The commentary has been thrice printed in Calcutta.

Beginning. प्रश्ने मनोः श्रूयतामित्युत्तरदानपर्य्यन्तं श्लोकचतुष्टयेनैतस्य शास्त्रस्य प्रेक्षावत्-प्रवृत्त्युपयुक्तानि विषयसम्बन्धप्रयोजनानि उक्तानि ।

No. 900.

MANU-SMṚITI WITH MANVARTHA-CHANDRIKÁ.

मनुस्मृतिः मन्वर्थचन्द्रिकाख्यटीकासहिता ।

A. Substance, country paper. Folia, 250. Lines on a page, 15. Character, Nágara. Date, ? B. Folia, 102. Lines on a page, 11.

Another copy of the work noticed under No. 897. It is accompanied with a commentary named Manvartha-chandriká. The name of the commentator is Mádhavánanda Sarasvatí. This work is very rare.

Beginning. आद्येऽध्याये सृष्टिचिन्ता ।

End. इति मानवे धर्मशास्त्रे भृगुप्रोक्तायां संहितायां द्वादशोऽध्यायः समाप्तः ।

No. 901.

MARAṆASÁMAYIKA-NIRṆAYA.

मरणसामयिकनिर्णयः ।

Substance, country paper. Folia, 19. Lines on a page, 10. Character, Nágara. Date, ?

On expiations and other rites to be performed at the time of death. Its author's name is not known.

No. 902.

MÁSATATTVA-VIVECHANA.

मासतत्त्वविवेचनम् ।

Substance, country paper. Folia, 14. Lines on a page, 9. Character, Nágara. Date, ?

On the months; how they are suitable for different feasts, fasts, sacrificial rites, domestic ceremonies, &c., &c. Anonymous.

Beginning. तत्रोपवासे सामान्यतिथिनिर्णय उच्यते ।—

या शुद्धा विमुहूर्त्तान्तमपि दृष्टापरेऽहनि ।
युग्माद्युत्तरतिथ्या च सैवोपोष्या हि केवलं ॥
या पूर्व्वतिथिविद्धापि परेऽहनि न विद्यते ।

End. विन्ध्याद्दक्षिण उल्लेख्य तत्र चोत्तरतस्ततः ।
छथ्याद्दिरेव नियताद्दाचरन्मण्डनं दिनात् ॥
इति मासतत्त्वविवेचनम् ।

No. 903.

MATṚIKÁ-PÚJANA-VIDHI.

मातृकापूजनविधिः ।

Substance, country paper. Folia, 4. Lines on a page, 10. Character, Nágara. Date, ?

Directions for worshipping the eight Mátṛikás or Matriarchs who are certain forms of Durgá.

Beginning. तत्र तण्डुलराशिषु वर्णादिप्रतिमासु वा । मातृका आवाह्य पूजयेत् ।

End. ऋविपुष्टिस्तथा तुष्टिरात्मनः कुलदेवता ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥
वाराही च तथेन्द्राणी चामुण्डा ——— । समाप्तः ।

No. 904.

MA'TRIKA-STHA'PANA.

मातृकास्थापनम् ।

Substance, country paper. Folia, 2. Lines on a page, 9. Character Nágara. Date, ?

Rules for consecrating images of the Mátṛikás. The author's name is not known.

Beginning. सम्मार्ज्जनं कृत्वा । गोमयेनोपलिप्तायां भूमौ सर्व्वान् व्रीह्यक्षतपात्रगुड़घृतगणेश-
गोत्रभट्टारिकागेवा(?)सूत्रकुङ्कुमपुष्पधूपदीप—

End. अक्षनमष्टिरक्षित्वा प्रणवतु पूयन्यऊतिसमुच्चय——(?) ।

No. 905.

MITÁKSHARÁ, ACHÁRÁDHYÁYA.

मिताक्षरा, आचाराध्यायः ।

A. Substance, country paper. Folia, 93. Lines on a page, 9. Character, Nágara. Date, ? B. Folia, 84. Lines on a page, 12. C. Folia, 69. Lines on a page, 11. D. Folia, 95. Lines on a page, 10. E. Folia, 113. Lines on a page, 11. F. Folia, 53. Lines on a page, 12. G. Folia, 188. Lines on a page, 10. H. Folia, 166. Lines on a page, 8. The last includes the first two parts of the work.

A commentary on the Smṛiti of Yajñavalkya. By Vijñanes'vara. The codices, except the last, include the first part of the work which treats of religious duties or A'chára.

Beginning. धर्माधर्मौ तद्विपाकास्त्रयोऽपि क्लेशाः पञ्च प्राणिनामायतं ते ।
यस्मिन्नेतैर्नो परामृष्ट ईशो यस्तं वन्दे विष्णुमोङ्कारवाच्यम् ॥

End. उत्तमोपपरस्येयं शिष्यस्य कृतिरात्मवान् ।
धर्म्मशास्त्रस्य विवृतिर्विज्ञानेश्वरयोगिनः ॥
इति याज्ञवल्क्यमुनिशास्त्रगताविवृतिर्न कस्य विहिता विदुषः ।
प्रमिताक्षरापि विपुलार्थवती परिषिञ्चति श्रवणयोरमृतम् ॥
आचाराध्यायः समाप्तः ।

No. 906.

MITA'KSHARA', PRA'YAS'CHITTA'DHYA'YA.

मिताक्षरा, प्रायश्चित्ताध्यायः ।

Substance, country paper. Folia, 318. Lines on a page, 8. Character, Nágara. Date, ?

The third part of the work noticed above. It is devoted to the description of the different expiations, Práyáschitta.

No. 907.

MITA'KSHARA', VYAVAHA'RA'DHYA'YA.

मिताक्षरा, व्यवहाराध्यायः, सुबोधिनीटीकासहितः ।

A. Substance, country paper. Folia, 115. Lines on a page, 13. Character, Nágara. Date, ? B. Folia, 96. Lines on a page, 15. C. Folia, ? Lines on a page, 10. D. Folia, 127. Lines on a page, 17.

The second part of the work noticed under No. 905. It treats of Judicature. It is accompanied with a commentary named Subodhiní, by Vis'ves'va Bhaṭṭa, son of Paṭṭi Bhaṭṭa.

Beginning. नमः सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरां नमः ॥
पट्टि-भट्टात्मजः श्रीमान् भट्टो विश्वेश्वरः सुधीः ।
व्याख्यां मिताक्षराख्यायाः कुरुते च सुबोधनीम् ॥

End. अत्यन्तगुणवत्प्रव्रजितागमनविषयं । तत्रैवाभ्यासविषयं वा नारदवचनम । एत-
द्विपरीतविषयं योगीश्वरवचनमिति न किञ्चिदेतत् खण्डनमेवेति नाक्रूनमित्यर्थः
इति स्त्रीसङ्ग्रहप्रकरणम् ।

No. 908.

MULA-S'ANTI.

मूलशान्तिः ।

Substance, country paper. Folia, 4. Lines on a page, 16. Character, Nágara. Date, ?

Rules for propitiatory rites to be performed in order to obviate the evil influences of the asterism Múla, when it happens to be the presiding star at one's nativity.

Beginning. भगवान् मूलजातायां विधिं मे ब्रूहि तत्त्वतः ।

End. इति ब्रह्मनारदसंवादे मूलगण्डात् शान्तिविधानं समाप्तम् ।

No. 909.

NA'MA-KARAṆA-VIDHI.

नामकरणविधिः ।

Substance, country paper. Folia, 3. Lines on a page, 12. Character, Nágara. Date, ?

Rules for the performance of the sacrament called Námakaraṇa, or the naming of a child with reference to the astral conjunctions at its birth.

Beginning. आदौ जननदिवसात् षष्ठेऽहनि दशमे वा बालस्य नामकर्म्मकरणं कार्य्यम् । अत्र सर्व्वनिषिद्धमङ्गलादिकं त्याज्यम् ।

End. ततो मन्त्राशीर्ग्रहणं । दीर्घायुर्भविष्यति । इति नामकरणम् ।

No. 910.

NA'NDI-S'RA'DDHA-PRAYOGA.

नान्दीश्राद्धप्रयोगः ।

Substance, country paper. Folia, 5. Lines on a page, 10. Character, Nágara. Date, ?

Directions for the performance of the s'ráddha on auspicious occasions, such as marriage, investiture with the holy thread, &c.

Beginning. एवं गुणविशेषेण विशिष्टायां पुण्यतिथौ अमुककर्म करिष्ये । तदङ्गत्वेनस्वस्ति-
पुण्याहवाचनमातृकापूजनं नान्दीश्राद्धञ्च करिष्ये ।

End. अत्र द्राक्षामलकदक्षिणाप्रत्याम्नायत्वेन किञ्चिद्यांविद्यान(?) समेयञ्च वृद्धिः ।
इति नान्दीश्राद्धप्रयोगः ।

No. 911.

NAVA-GRAHA-MAKHA.

नवग्रहमखः ।

Substance, country paper. Folia, 33. Lines on a page, 10. Character, Nágara. Date, ?

Directions for the performance of a rite called Navagraha-makha, or the worship of the nine planets.

Beginning. कर्मारम्भदिने यजमानः सङ्कल्पस्नानं विधाय सन्ध्य दिवेश्यदेवान्तं कर्म समाप्य
हस्ते फलं गृहीत्वा देवं नमस्कृत्य वाद्यघोषपूर्व्वकं शान्तिपाठं पठद्भिः ब्राह्मणैं
सह वाचनस्थले आगत्य सर्व्वान् नमस्कृत्य—

End. इति नवग्रहमखाख्यं कर्म्म समाप्तम् ।

No. 912.

NAVARATRA-NIRNAYA.

नवरात्रनिर्णयः ।

Substance, country paper. Folia, 16. Lines on a page, 11. Character, Nágara. Date, ?

On the Vrata or fast named *Navarátra.* This *vrata* is commenced on the first day of the lunar month of Ás'vina and finished on the ninth; whence the name. By Gopála Vyása, son of Umes'a Bhatta.

Beginning. त्र्यम्बकस्यास्य गोपालस्यामस्येयं सरस्वती ।
विरोधिनां तिरोभावभव्या विजयतेतराम् ॥
बालक्रीड़ावशाद्येन भग्नः शाकटिकः परः ।
विद्याकुर्व्वन्तु गोपालं तं कृष्णार्ज्जुनसारथिम् ॥

End. इति श्रीमत्पदवाक्यप्रमाणपारावारधुरीणश्चाङ्कोलकरोपनामकभट्टनारायणान्तेवासिना त्र्यम्बकसोमेश्वभट्टात्मजेन गोपालव्यासेन कृतः सकलग्रन्थसारार्थाभिधः सङ्क्षेपेण नवरात्रनिर्णयः ।

No. 913.

NAVAMU'RTI-PRATISHṬHA'-VIDHI.

नवमूर्त्तिप्रतिष्ठाविधिः ।

Substance, country paper. Folia, 12. Lines on a page, 10. Character, Nágara. Date, ?

Directions for the consecration of new images. Anonymous.

Beginning. नवमूर्त्तिप्रतिष्ठापने वैखानसोक्तसंस्कारा वक्ष्यन्ते ।
नवमूर्त्तिप्रतिष्ठायां प्रकाराः षोड्शोदिताः ।
अनेन विधिना कुर्व्वन् सर्व्वं भवति चाक्षयम् ॥

End. देवाय यज्ञं तन्वाना अवघ्नन् पुरुषं पशुम् ।
यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ते ह नाकं महिमानं स च यत्र पूर्व्वे साध्याः सन्ति देवाः ।

No. 914.

NIRṆAYA'MṚITA.

निर्णयामृतम् ।

Substance, country paper. Folia, 182. Lines on a page, 12. Character, Nágara. Date, ?

On obligatory diurnal duties. Written by Gopínáráyaṇa, under the auspices of the king Súryasena. 'Notices of Sanskrit MSS.' I, 151.

Beginning. श्रीहरिहरब्रह्मवेदव्यासशुकपराशरेभ्यो नमः ।
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

End. बुधानामुपकाराय व्यामूढचेतसां तथा ।
गोपीनारायणेनेदं प्रणीतं निर्णयामृतम् ॥
इति श्रीसूर्य्यसेनमहिमेन्द्रविरचितं निर्णयामृतं सम्पूर्णं जातम् ॥

No. 915.

NIRṆAYA-DARPAṆA.

निर्णयदर्पणः ।

Substance, country paper. Folia, 90. Lines on a page, 11. Character, Nágara. Date, Samvat 1744.

On S'ráddha and other domestic rites. By S'ivánanda, son of Tárápati.

Beginning. निबन्धान्निखिलान् ज्ञात्वा करोति प्रमिताचरम् ।
नत्वा शिवं शिवानन्द इमं निर्णयदर्पणम् ॥
तत्रेह सुखस्य प्राधान्यात् तत्साधनीभूतसुकृतासाधारणकारणदानव्रतोपवासश्राद्धादिक्रियाकलापोत्पत्तिनिमित्तत्वनादौ कालो विचार्य्यते तस्यैकत्वेऽप्यब्दोऽयनमृतुर्मासः पक्षो दिवसः प्रहरो मुहूर्त्त इत्युपाधिभेदेन नानात्वमनुभूयते ।

End. इति श्रीठक्कुरतारापतितनुजशिवानन्दविरचिते निर्णयदर्पणे श्राद्धप्रकरणं समाप्तम् ।

No. 916.

NIRṆAYA-DÍPAKA.

निर्णयदीपकः ।

Substance, country paper. Folia, 339. Lines on a page, 10. Character, Nágara. Date, ?

A calendar of fasts and penances.

Beginning. देवः श्रीशम्भुजन्मा गणपतिरखिलान्नागरानार्य्यवृन्दान्
रक्षत्वस्मिन् समस्ते जगति +भयतो यत्र कुत्र स्थितांश्च ।
येषां सम्प्रवृत्ता परमविधियुता पञ्चयज्ञान्विता या
धर्म्या स्वाचारयुक्ता न विरमति यतो नित्यचर्य्या कदाचित् ॥

End. उक्तेषु निर्णयेषु प्रवर्त्तमानानां पुंसां सर्व्वकार्य्येषु मङ्गलं स्यादिति मङ्गलम् ।
पूर्णोऽयं ग्रन्थः । नानानिर्णयसम्पन्नकृतो निर्णयदीपकः समाप्तः ।

No. 917.
NIRṆAYODDHA'RA.
निर्णयोद्धारः ।

Substance, country paper. Folia, 7. Lines on a page, 12. Character, Nágara. Date, ?

A calendar of fasts and penances. By Rághava.

Beginning. निर्णयोदन्वतः सारमुक्तोद्धारं करोम्यहम् ।
राघवो विदुषां प्रीत्यै निर्णयोद्धारनामकम् ॥
तिथिर्द्वेधा शुद्धा विद्धा च । तत्र शुद्धा सम्पूर्णत्वान्निर्णयानर्हा । तिथ्यन्तरेण दूषिता विद्धा ।

End. एकादशी च वृद्धा दिनद्वयेऽप्यस्ति । तदा प्रथमायां शुद्धायामप्येकादश्यां नोपवासः किन्त्वर्वाग्विद्धायामेव । इति श्रीराघवकृतं निर्णयोद्धाराख्यं सम्पूर्णम् ।

No. 918.
NIRṆAYA-SINDHU.
निर्णयसिन्धुः ।

Substance, country paper. Folia, 299. Lines on a page, 12. Character, Nágara. Date, ?

A digest of the different topics treated in the Smṛitis. By Kamalákara Bhaṭṭa. The work is held in high estimation as the leading text current in the North Western Provinces.

Beginning. कारुण्यैकनिकेतनं रामं सीतान्वया युक्ताम् ।
विश्वामित्रान्ववायव्रततिसमलम्बशाखिनं वन्दे ॥

End. यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।
तं हि देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

No. 919.
NṚISIṄHA-PARICHARYA'-PRATISHṬHA'-KALPA.
नृसिंहपरिचर्य्याप्रतिष्ठाकल्पः ।

A. Substance, country paper. Folia, 12. Lines on a page, 9. Character, Nágara. Date, ? B. Folia, 8. Lines on a page, 12.

On the consecration and worshipping of the image of Nṛisiṅha.

Beginning. बौधायनादिसन्मूलाश्चैविक्रम्यादिपद्धतीः ।
वीक्ष्य वक्ष्यामि विष्णवादिदलास्थापनाविधिः ॥
तत्र प्रतिष्ठाकालः । उदगयने माघादिषु पञ्चसु मासेषु शुक्लपक्षे चतुर्थीषष्ठी-
ष्टमीचतुर्दशीव्यतिरिक्तायां तिथौ कृष्णपक्षे दशम्यां प्रागन्यतमस्यामतिवि-
धायां तिथौ ।

End. एवं प्रतिष्ठां यो कुर्य्यात् सोऽत्यन्तं सुखमश्नुते ।
न विघ्नशीलेन न दाम्भिकेन न लिङ्गिना स्थापनमत्र कार्य्यम् ।
विप्रेण कार्य्यं हरिभक्तभाजा गृहस्थधर्म्माभिरतेन नित्यम् ॥
इति नृसिंहपरिचर्य्याप्रतिष्ठाकल्पः ।

No. 920.

NṚISIṄHA-PRASADA, DA'NASA'RA.

नृसिंहप्रसादे दानसारः ।

Substance, country paper. Folia, 174. Lines on a page, 14. Character, Nágara. Date, 1608.

A Smṛiti digest. The codex comprises only the chapter on the consecration of gifts. Written by Nṛísiṅhaprasáda, under the auspices of Nizám Sháh.

Beginning. प्रणम्य लक्ष्मीपतिमाद्यदेवं सर्व्वोत्तमं भक्तजनप्रसन्नम् ।
इन्द्रादिदेवादिविभाविनश्च करोमि यत्नाद्दृढदानसारम् ॥
श्रीनृसिंहप्रसादे तु दानसारे दलाधिप(?) ।
प्रक्रियानुक्रमं वक्ति +++++मुदे ॥

End. श्रीमद्वल्लभसूनुरात्मनिरतः सत्सम्प्रदायाग्रणीः
सारे दानमनुत्तमं विचतुरं श्रीमान् दलाधीश्वरः ॥
श्रीनिजामसाहमाधाव्यधुरन्धरमहीपतिः ।
श्रीनृसिंहप्रसादेऽस्मिन् सम्पूर्णं कुरुते शुभम् ॥
इति नृसिंहप्रसादे दानसारः समाप्तः ॥

No. 921.

NṚISIṄHA-PRASÁDA, S'ANTISÁRA.

नृसिंहप्रसादे शान्तिसारः ।

Substance, country paper. Folia, 12. Lines on a page, 10. Character, Nágara. Date, ?

Another part of the work noticed under the last preceding No. It treats of rites to be performed in order to obtain relief from calamities.

Beginning. सर्व्वोत्तमं प्रणम्यादौ दलाधीशेन भुभुजा ।
क्रियते शान्तिसारोऽयं सर्व्वलोकहितैषिणा ॥

End. एवं कृते विधाने तु विघ्ना नश्यन्ति तत्क्षणात् ।
मोदते सुखसन्तानैः सह माचा निजे गृहे ॥
इति न्रसिंहप्रसादे शान्तिसारः सम्पूर्णः ।

No. 922.

PALLIKÁPRAS'NA, S'ARAṬAPALLI-S'ÁNTI-VIDHI.

पल्लिकाप्रश्ने शरटपल्लीशान्तिविधिः ।

Substance, country paper. Folia, 5. Lines on a page, 11. Character, Nágara. Date, ?

Consequences of the falling of a lizard and other reptiles on particular parts of the body and expiations for the same.

Beginning. अथातः सम्प्रवक्ष्यामि फलं पल्ल्याः प्रपातने ।
पल्लिका पतनं दृष्ट्वा तत्तदङ्गं विनिर्दिशेत् ॥
गार्ग्यवराहमाण्डव्यनारदाद्यैर्यथोदितम् ।
तत्र कालविशेषेण ज्ञातव्यश्च विचक्षणैः ॥

End. शौनकोक्तशरटपल्लीशान्तिविधिः ॥ इति पल्लिकाप्रश्नः समाप्तः ।

No. 923.

PANCHADAS'A-SAṄSKÁRA.

पञ्चदशसंस्कारः ।

Substance, country paper. Folia, 6. Lines on a page, 12. Character, Nágara. Date, ?

A metrical digest of the rules regarding 15 of the principal Sanskáras or sacraments. By S'aunaka. A rare work.

Beginning. गर्भाधानं पुंसवनं सीमन्तं जातकर्म्म च ।
नाम निष्क्रमणं चान्नप्राशनं चौलकर्म्म च ॥
तथोपनयनञ्चैव महानाम्नी महाव्रतम् ।

End. दम्पत्योरुभयोर्द्देत्तं कलशस्य प्रपूजयेत् ।
ब्राह्मणं भोजयित्वा च ततः कर्म्म समापयेत् ॥
इति शौनककारिकोक्तपञ्चदशकर्म्म सम्पूर्णम् ।

No. 924.

PARAMES'VARI'DA'SA'BDHI ALIAS SMRITI-SANGRAHA.

स्मृतिसङ्ग्रहः, वा परमेश्वरीदासाब्धिः ।

A. Substance, country paper. Folia, 190. Lines on a page, 9. Character, Nágara. Date, ? B. Folia, 70. Lines on a page, 10. A fragment.

A Smriti digest. By Mis'ra Horila.

Beginning. कालिन्दीसलिलान्तिकेऽर्भकवृतो वृन्दावनस्यान्तरे
कुञ्जे स्वां मुरलीं प्रवादयति यां नन्दाङ्गजो नित्यदा ।
बर्हालङ्करणैर्विराजितवपुर्गुञ्जावतंसैः शुभै-
स्तन्वैर्धातुविभूषणैः पृथुयशा दध्यात् स नो मङ्गलम् ॥

End. इति श्रीपरमेश्वरीदासाब्धौ मिश्रहोरिलकृतेऽधिव्रतोद्यापनम् । श्रीपरमेश्वरीदासाब्धिसङ्ग्रहकः स्मृतिसङ्ग्रहः समाप्तः ।

No. 925.

PARA'S'ARA-SMRITI.

पराशरस्मृतिः ।

A. Substance, country paper. Folia, 9. Lines on a page, 11. Character, Nágara. Date, ? B. Folia, 9. Lines on a page, 11.

The Institutes of Parás'ara. Printed in Calcutta.

Beginning. पराशरमतं पुण्यं पवित्रं पापनाशनम् ।
चिन्तितं ब्राह्मणार्थाय धर्म्मसंस्थापनाय च ॥

चतुर्णामपि वर्णानामाचारो धर्म्मपालनम् ।
आचारभ्रष्टदेहानां भवेद् ब्रह्म पराङ्मुखम् ॥

End. धान्यं वस्त्रं सुवर्णानि भोजनञ्च विशेषतः ।
गवां शतं प्रदद्यात्तु चातुर्वर्ण्यविधिस्मृतिः ॥
इति श्रीपराशरप्रणीते धर्म्मशास्त्रे एकादशोऽध्यायः ।

No. 926.

PARAS'ARA-SMṚITI-VYA'KHYA'.

पराशरस्मृतिव्याख्या ।

Substance, country paper. Folia, 325. Lines on a page, 13. Character, Nágara. Date, ?

A commentary on the work noticed under the last preceding No. By Mádhava A'chárya. It is defective both at the beginning and at the end.

Beginning. खण्डितत्वात् प्रारम्भवाक्यस्यानुपलब्धिः ।
श्रीमती जननी यस्य सुकीर्त्तिः सायणः पिता ।
सायणो भोगनाथश्च मनोबुद्धिसहोदरौ ॥
यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी (?) ।
भारद्वाजं कुलं यस्य सर्व्वज्ञः स हि माधवः ॥

End. मातुः सपिण्डा ये वा स्युः ये वा मातुः सहोदकाः ।
कुर्य्युरेनं विधिं सम्यगपुत्रस्य सुता स्मृताः ॥
सर्व्वाभावे स्त्रियः कुर्य्युः स्वभर्त्तॄणाममन्त्रकम् ।
तदभावे च नृपतिः कारयेत् तस्य रिक्थतः ॥

No. 927.

PARAS'URA'MA-PRAKA'S'A.

परशुरामप्रकाशः ।

Substance, country paper. Folia, 928. Lines on a page, 9. Character, Nágara. Date, ?

A Smṛiti digest. By Paras'uráma.

Beginning. श्रीमेकं श्रीमेपतिं स्थितपदयुगलं श्रीपदं श्रीनिवासं
श्रीरामं मुक्तिलक्ष्मीवितरणपटुपदं पद्मनाभं सुरेशं ।
श्रीकण्ठस्वर्णरूपं स्वपनमितिभिदावर्ज्जितं कालरूपं
नत्वा तिथ्यादिकाण्डं भृगुकुलतिलकं श्रीपतायो विधत्ते(?) ॥

End. वृद्धिश्राद्धे सपिण्डे च प्रेतश्राद्धेऽनुमासिके ।
